Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 4 | ISSN : 2582-0095

# शक्तिविमर्शः



**राजेश मण्डल**
**शोधच्छात्रः ,व्याकरणविभागः,**
**राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः**

**सारांशः-** नैयायिकानां मते मुख्या जघन्या चेति द्विविधा वृत्तिः। आलङ्कारिकैः अभिधा लक्षणा व्यञ्जना भेदेन तिस्रः वृत्तयः स्वीक्रियन्ते। यद्यपि प्राचीनवैयाकरणाः सर्वेषां शब्दानां सर्वार्थवाचकत्वस्याङ्गीकारात् लक्षणाख्यवृत्त्यन्तरस्वीकारो व्यर्थः इति प्रतिपादयन्ति तथापि नव्यानां मञ्जुषादिग्रन्थेषु तिसृणां वृत्तीनां गहनातिगहनो विचारो दृश्यते। नागेशेन वृत्तिस्त्रिधा शक्तिर्लक्षणा व्यञ्जना चेति स्वकीयवैयाकरणसिद्धान्तलघुमञ्जूषायां प्रतिपादितम्। तत्र विद्यमाना शक्तिः इत्यस्याः विचारः मया सुकुमारमतिना विचारितः।

**मुख्यशब्दः –** सम्बन्धः, वृत्तिः, अभिधा, लक्षणा, व्यञ्जना, शक्तिः।

पदपदार्थयोः सम्बन्धः वृत्तिरिति उक्ता। सा च केषाञ्चिन्मते शक्तिलक्षणान्यतररूपा, शक्तिलक्षणाव्यञ्जनान्यतमरूपा च। तत्र का नाम शक्तिरिति जिज्ञासायां अत्रोच्यते शक्तिर्नाम सामर्थ्यम्। शक्यते प्रतिपादयितुमर्थः शब्दानामनया इति शक्तिः। शक् धातोः (शक्लृ धातोः) करणार्थे क्तिन्प्रत्यये शक्तिः इति शब्दः निष्पद्यते। अत्र पदस्य ज्ञानजननसामर्थ्यमेव शक्तिः। लोकेऽस्मिन् पदश्रवणानन्तरं श्रोतुः यज्ज्ञानमुत्पद्यते तस्मिन् ज्ञाने कश्चन पदार्थो विषयी भवति। न हि सर्वेभ्यः पदेभ्यः सर्वेषां पदार्थानामुपस्थितिर्भवति। घटमानय इति वाक्येऽस्मिन् घटशब्दात् कम्बुग्रीवादिमदर्थस्य प्रतीतिर्जायते। अत्र घटपदेन सह कम्बुग्रीवादिमदर्थस्य यः साक्षात्सम्बन्धः स एव शक्तिपदेन व्यवह्रियते। यद्यपि पदपदार्थयोरयं सम्बन्धः सर्वैः शब्दप्रमाणवादिभिः निर्विवादं स्वीक्रियते तथापि सम्बन्धस्यास्य स्वरूपविषये मतभेदः परिलक्ष्यते।

**शक्तिस्वरूपविचारे प्राचीनवैयाकरणानां मतम्**

प्राचीनवैयाकरणैः वाक्ये पदार्थयोः पदार्थानां वा परस्परं यः सम्बन्धः स एव शक्तिरित्युच्यते। तच्छक्तिरूपसम्बन्धः सूत्रदृष्ट्या तादात्म्यरूपसम्बन्ध एव। यतो हि **वृद्धिरादैच् , अदेङ्गुणः** इत्यादिषु सूत्रेषु (शक्तिग्राहकेषु) समानविभक्त्यन्तता संज्ञासंज्ञिनोः प्रदर्शिता सूत्रकारेण। यथा **नीलो घटः** इत्यत्र तादात्म्यसम्बन्धेन नीलविशिष्टघटः इति प्रतीतिः तथैव

**वृद्धिरादैच्, अदेङ्गुणः** इत्यत्रापि तादात्म्यसम्बन्धेन वृद्धविशिष्टाकारैकारौकाराः गुणविशिष्टाश्च अदेङ् इत्येषां प्रतीतिर्भवति। एतदेवाधारीकृत्य **वृद्धिरादैच्** इत्यस्मिन् सूत्रेभाष्ये उक्तमस्ति यद् द्वयोरेव सामानाधिकरण्यं विशेषणविशेष्ययोर्वा संज्ञासंज्ञिनोर्वा। अत्र उद्योतकारस्तु तादात्म्यमेव शब्दार्थयो शक्तिरिति वदति [i]। किञ्च हरिवृषभेणाऽपि शब्दार्थयोस्तादात्म्यमेव सम्बनधः शक्तिरिति स्वीक्रियते[ii]।

भर्तृहरिमते-

**इन्द्रियाणां स्वविषयेष्वनादियोग्यता यथा।**
**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा।।**[iii]

यथा चक्षुरादीन्द्रियेषु घटादिचाक्षुषकारणत्वम् अनादि,तथा घटादिपदे घटादिशब्दबोधकारणत्वम् अनादिः वर्त्तते। सैव शक्तिः। बोधकत्वे अनादित्वञ्च स्वप्रयोज्यशब्दबोधसमानाकारपूर्वपूर्वबोधध्वंसकालीनत्वम्। बोधकत्वं शक्तिरित्यभिधानं ज्ञायमानं पदं शाब्दकारणम्। यदा तु पदज्ञानमेव बोधकारणमिति निष्कृष्टतममाद्रियते तदा बोधजनकज्ञानविषयत्वं शक्तिः। न च यत्र घटपदगजोभयविषयकसमूहालम्बनज्ञान-विषयत्वं गजेऽपि वर्त्तते इति गजस्यापि घटवाचकत्वापत्तिरिति वाच्यम्।बोधजनकताबच्छेदकविषयिकताकत्वस्य विवक्षितत्वात्। प्रकृते च समूहालम्बनस्य घटपदविषयकत्वेनैव घटशाब्दबोधकारणत्वमिति बोधजनकतावच्छेदिका पदनिरूपितैव विषयतेति नातिप्रसङ्गः। तथा च निष्कृष्टमते बोधजनकतावच्छेदकविषयिताकत्वं शक्तिरिति सिद्धम्।

**मञ्जुषाकारमते शक्तिनिर्णयः**

नागेशभट्टपादैः शब्दार्थोभयनिष्ठो वाच्यवाचकभावरूपसम्बन्ध एव शक्तिरिति स्वीकृतम्। तत्र वाच्यश्च वाचकश्च वाच्यवाचकौ तयोर्भावः वाच्यवाचकभावः इति व्युत्पत्या एकस्याखण्डस्य सम्बन्धस्य लाभो भवति। सम्बन्धश्च पदे पदार्थेऽपि वर्त्तते। पुनः तस्य सत्ता पृथगपि अस्ति।स च विशिष्टबुद्धिर्नियमं स्थापयति। अनेन शब्दविशिष्टमेवार्थं बोधयति।[iv] अत्र सुष्पष्टं ज्ञायते यत् नागेशोक्तदिशा पदपदार्थयोः यो विशिष्टः सम्बन्धः, स एव शक्तिः। तस्या एव पर्यायवाची वाच्यवाचकभावो वर्त्तते। तथाविधं शक्तिज्ञापकं योऽयं शब्दः सोऽर्थः, योऽर्थः सः शब्दः इत्याकारेतरेतराध्यासमूलकं तादात्म्यम् [v] । तदेव संकेतः। तस्य सङ्केतस्य पदनिष्ठशक्त्युपकारकत्वाच्छक्तिरिति व्यवहारः।

ननु तादात्म्यमेव शक्तिरस्तु इति चेन्न। तस्य सम्बन्धत्वाभावात् सम्बन्धविशिष्टस्यैव शक्तित्वेन तादात्म्ये सम्बन्धत्वासम्भावात् न शक्तित्वम्। तादात्म्यं हि वास्तविकभेदविशिष्टारोपिताभेद एव। तत्र तादात्म्यघटितभेदस्याभेदस्य वा सम्बन्धत्वं क्वापि न दृश्यते[vi]। भेदस्य सम्बन्धत्वं कुत्रापि न दृश्यते। अभेदस्यापि सम्बन्धत्वं न सम्भवति। तस्य

प्रतियोग्यनुयोगिभिन्नत्वाभावेन सम्बन्धद्वयभिन्नत्वाभावात्। नीलो घटः इत्यादौ सम्बन्धपदार्थघटकसम्बन्धभिन्नत्वाभावादभेदस्यापि सम्बन्धत्वं नास्ति इति वैयाकरणसिद्धान्तात्। ज्ञातस्यैव सङ्केतस्य शक्तिबोधकत्वं दर्शितम्। तथा पाणिन्यादिस्मृतिबोधकसङ्केतस्यैव वाचकतानियामकत्वं न तु आधुनिकसङ्केतस्य। एवञ्चाधुनिकसङ्केतेत्युक्ते संज्ञास्थले ( यथा घटेति कस्यचित्संज्ञा) एवञ्च नामस्थले इत्युक्ते गोविन्देति कस्यचित् द्वादशेऽह्नि क्रियमाणं नाम तस्मिन् स्थले च घटगोविन्दादिगुणाद्यारोपेण घटत्वगोविन्दत्वरूपप्रवृत्तिनिमित्तयोरारोपेण तत्प्रकारकतयैवाधुनिकघटगोविन्दयोर्बोधः।

**तादात्म्यस्य शक्तित्वे दोषस्तन्निरासः**

ननु शब्दार्थयोस्तादात्म्ये स्वीकृते अग्निशब्दोच्चारणे मुखं दग्धं स्यादिति चेन्न। तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वमिति तादात्म्यलक्षणस्वीकारात्। अत एव मधुशब्दोच्चारण नैव माधुर्यानुभूतिः। आरोपिताभेदेन एकस्य सम्बन्धिनः कार्यमपरेण सम्बन्धिना कर्त्तुं शक्यते। वैयाकरणमते तु बौद्ध एवार्थः शक्यः। बौद्ध एव शब्दः शक्यः इति स्वीकारात्। बौद्धे पदार्थे दाहादिसामर्थ्यं नानुभूतत्वात् अग्निशब्दोच्चारणे मुखे न दाहो भवति।

**मीमांसकानां मते शक्तिस्वरूपम्**

मीमांसकानां मते शक्तिः पदार्थान्तरम्। सा च पदपदार्थयोः वाच्यवाचकनियामिका। वैशिष्ट्याख्यसम्बन्धेनार्थनिष्ठा सा शक्तिः प्रतियोगित्वसम्बन्धेन पदनिष्ठा। मीमांसादर्शने प्रत्याय्यप्रत्यायकभावापरपर्यायमनुभाव्यानुभावकत्वं शब्दार्थयोः सम्बन्धः शक्तिरिति गृहीताऽस्ति। तत्र शब्दस्याऽर्थोऽनुभाव्य, अर्थस्य च शब्दोऽनुभावकः। श्रूयमाणानि च पदसमूहवाक्यानि अर्थविशेषं च बोधयन्ति। तत्र शब्दस्यार्थः प्रत्याय्यः, अर्थस्य शब्दः प्रत्यायकश्चेति। अनुभाव्यानुभावकत्वव्यवहारस्तु पदार्थस्मृतावतिव्यप्ति-वारणाय प्रयोगोऽस्ति।

**आलङ्कारिकमतेऽभिधास्वरूपम्**

आलङ्कारिकाः शक्तिमभधेति कथयन्ति। अभिधा नाम व्यापारः[vii]। कस्य व्यापारः इति जिज्ञासायां शब्दार्थयो यो मुख्यो व्यापारः स एवाभिधा[viii]। कविराजविश्वनाथमते शब्दः यया शक्त्या साक्षात् स्वसङ्केतितार्थं बोधयति साभिधेति[ix]। यथा गोशब्दोच्चारिते सास्नादिमदर्थस्य साक्षात् यत्प्रतीतिः सैव तस्य शब्दस्य सङ्केतः। तथैव घटशब्दोच्चारिते कम्बुग्रीवादिमदर्थस्य यत्प्रतीतिः सैव घटशब्दस्य साक्षात्सङ्केतः। एवञ्च विश्वनाथोक्तदिशा शक्त्यपरपर्यायः सङ्केतितार्थबोधजनकव्यापोरोऽभिधा।तत्र सङ्केतितार्थ नाम मुख्यार्थः[x]। अस्यायं भावो यद् शब्दव्यापाराद् योऽर्थोऽव्यवधानेन ज्ञायते सः मुख्यः। मुखमिव मुख्यम्। तथा हस्तपादादिभ्योऽवयवेभ्यः पूर्वं मुखमवलोक्यते तथा सर्वेभ्यः प्रतीमानार्थेभ्यः(लक्ष्यव्यङ्ग्यतात्पर्यरूपेभ्यः) पूर्वं शब्दस्य योऽर्थः गृह्यते, तत्तस्य मुख्यत्वम्। येन

शब्देन शब्दस्य मुख्योऽर्थोऽभिधीयते असौ वाचकः शब्दः। यथा घटपटादिः। अर्थश्च वाच्यः। वाचकाच्छब्दात्सङ्केतितं वाच्यमर्थं बोधयन्ती शक्तिरभिधैव।[xi]

अनेन स्पष्टं प्रतीयते यत् शब्दार्थयोः यः पारस्परिकसम्बन्धः स एवालङ्कारिकैः अभिधावृत्तिरित्युच्यते। साहित्यमीमांसाकारमते –

**अर्थमव्यवधावेव स्पृशन्ती मुखवर्त्तिनीष**
**मुख्या वृत्तिर्वदन्त्येनामभिधेति विपश्चितः।**[xii]

रसगङ्गाधरकारस्तु – शक्त्याख्योऽर्थस्य शब्दगतः शब्दस्यार्थगतो वा सम्बन्धविशेषोऽभिधा[xiii] इत्याह।

**शक्तिस्वरूपविचारे नैयायिकानां मतम्**

नैयायिकानां मते शक्तिः ईश्वरसङ्केतरूपा[xiv]। सङ्केतस्तु **अस्माच्छाब्दादयमर्थो बोद्ध**व्यः इति अर्थविशेष्यिका। **इदं पदमीममर्थं बोधयतु** इति पदविशेष्यिका वेश्वरेच्छारूपा।[xv] तन्मते ईश्वरो नित्यः। अतो नित्यसङ्केतरूपा शक्तिः। घटपदार्थो घटपदजन्यबोधविषयतावान् भवतु इति **(अस्माच्छब्दादयमर्थो बोधव्यः)** अर्थमुख्यविशेष्यिका शक्तिः। घटपदं घटत्वाविच्छिन्नविषयताबोधजनकतावद् भवतु **(इदं पदमिममर्थं बोधयतु)** इति च पदमुख्यविशेष्यिका शक्तिः। तया शक्त्याऽरथबोधकः शब्दः वाचको भवति। यथा घटशब्दो घटत्वविशिष्ठघटशब्दस्य वाचकः। तेन योऽर्थो बोध्यते स तस्य वाच्यो भवति। स एव मुख्यार्थः।

परन्तु अत्र इत्थं शङ्का जायते यत् ईश्वरेच्छायाः शक्तित्वे पुत्रादौ पित्राद्युच्चारिते देवदत्तादिनाम्नि शक्तिर्न स्यात्। ईश्वरेच्छायाः तत्राभावात् अयं पिता अस्य पुत्रस्य कृते इदं नाम कुर्यात् इति ईश्वरस्य विशेषेच्छा नास्ति। परन्तु तन्न। आधुनिके नाम्नि अपि शक्तिः स्वीक्रियते।[xvi] **एकादशे अहनि पिता नाम कुर्यादिति ईश्वरेच्छायाः** पित्राद्युच्चारिते आधुनिके पुत्रादिबोधके देवदत्तादि नाम्न्यपि वर्त्तमानात् ईश्वरेच्छारूपा शक्तिः सामान्यरूपेण तत्र तत्र अस्त्येव।

केषाञ्चिन्नैयायिकानां मते आधुनिकमात्रसङ्केतिते नदीबृद्ध्यादिपदे न शक्तिः। आधुनिकमात्रोच्चारिते नद्यादिपदे ईश्वरेच्छाया अभावात्। तथा चोक्तं शक्तिवादे आधुनिकसङ्केतः परिभाषा इति कथं तर्हि नद्यादिपदाच्छाब्दबोधो भविष्यतीति जिज्ञासायामुच्यते यत् तत्र शक्तिभ्रमाल्लक्षणया बोधः[xvii]।

नव्यनैयायिकानां मते तु इच्छासामान्यैव शक्तिर्न तु ईश्वरेच्छायारूपा। **तेनाऽस्मात् पदादयमर्थो बोधव्य** इति अस्मादादीनामिच्छापि शक्तिः। तथा च आधुनिकसङ्केतितेऽपि शक्तिरूपपन्ना भवति। एवञ्च नव्यमते सङ्केतो नित्यानित्याभेदेन द्विविधः। तेन शक्तिरपि

द्विविधा। नित्यसङ्केतः ईश्वरेच्छारूपः। अनित्यसङ्केतश्च जीवेच्छारूपः। स एवाधुनिकसङ्केत इत्युच्यते। प्रसङ्गेऽस्मिन् कोविदानन्दकारेणाऽपि उक्तं यत्-

**स ईश्वरकृतः साधौ शब्दे शास्त्रं तु शास्तितम्।**
**असाधौ व्यवहारादेः संवेद्य सः सुधीकृतः।**[xviii]

अत्रापि सङ्केतः द्विविधः। ईश्वरकृतः सुधीकृतश्च। संस्कृतशब्दे ईश्वरकृतः, प्राकृते तु सुधीकृतः। प्रसिद्धनैयायिकविश्वनाथपञ्चाननमते- **शक्तिश्च पदेन सह पदार्थस्य स**म्बन्धः[xix]। स चास्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छारूपः। अनेन नैयायिकमते ईश्वरेच्छा इच्छा वा शक्तिरिति दिक्।

**वैयाकरणमतेन न्यायमतनिरासः**

नैयायिकैः **अस्माच्छब्दादयमर्थो बोधव्य** इत्याकारा **इदं पदमिममर्थं बोधयतु** इत्याकारा वेश्वरेच्छा शक्तिरिति लक्षणं यदुक्तं तन्न समीचीनम्। शक्तिग्राहकशिरोमणेर्व्यवहारात् तस्याः ज्ञानस्याभावात्। तथा हि शक्तिज्ञानं वृद्धव्यवहाराज्जायते। यथा- प्रयोजकवृद्धेन घटमानय इत्युक्ते तथा कुर्वन्तं प्रयोज्यवृद्धं पश्यता बालेनानुमीयते **अयं प्रयोज्यबृद्धो घटानयनमत्कार्यम् इति** ज्ञानवान् घटानयनविषयकचेष्टात्वात्। ततः प्रयोज्यवृद्धज्ञानं **घटमानय इति** वाक्यजम्। तद्वाक्यश्रवणाव्यवहिततोत्तरमेव तत्प्रवृत्तेः इति अनुमानेन ज्ञानजनकत्वं वाक्ये निश्चीयते। तत आवापोद्वापाभ्यामन्वयव्यतिरेकेण च पदादिष्वपि पदार्थविषयकबोधजनकत्वं निर्धार्यते। तच्चेदं पदे वाक्ये वा यद्बोधकत्वं तत्पदस्य वाक्यस्य वा अर्थेन सह सम्बद्धानामेव चक्षुरादिप्रमाणानां बोधजनकत्वानुभवात्। न हि घटेन सह सम्बन्धमन्तरा चक्षुरादीन्द्रियं तज्ज्ञानं जनयितुं शक्नोति। तथा च पदवाक्ययोः बोधजनकत्वस्यान्यथानुपपत्त्या कल्पनीयः शक्तिरूपः कारणसम्बन्धः ज्ञानरूपकार्योत्पत्तेः प्रागेवोपेक्ष्यते। तदानीञ्च नैयायिकाभिमतस्य ईश्वरेच्छारूपस्येच्छारूपस्य वा सम्बन्धस्यासिद्धत्वेन ज्ञाततया एव शक्तेर्बोधिकात्वेन शक्तिग्रहासम्भवः स्यात्[xx]।

अत्रैवमवधारणीयं यत्- शाब्दबोधात्पूर्वं तत्कारणीभूतं शक्तिज्ञानमपेक्षितम्। बोधजननात् प्राग् बोधजनकत्वाभावादिदं पदमिति निश्चयसत्त्वेन तद्वत्ताज्ञानं प्रति तदभाववत्तानिश्चयस्य प्रतिबन्धकत्वेन इदं पदं एतदर्थविषयकबोधकतावत् इत्यादि स्वरूपस्य बोधजनकघटितेच्छात्मकस्य शक्तिपदार्थस्य ज्ञानमसम्भाव्यमिति तत्त्वम्।

किञ्च इदमस्माद् भवतु एवमीश्वरेच्छाया ईश्वरज्ञानस्य वा शक्तित्वस्वीकारेण एकतरपक्षपातियुक्तेरभावात् तार्किकमते गौरवतामावहति।[xxi] यदि च इदमस्माद् भवतु एवमिच्छाविषयमेवार्थजनकं स्वीकरिष्यामः तदाप्यव्यवस्था स्यात्। प्रमाणप्रमेययोः सम्बन्धोऽपि जन्यजनकभावसम्बन्धात् भिन्नः। तेन पृथकसम्बन्धेनैव प्रमाणानि ज्ञानजनकानि दृश्यन्ते। अतः ईश्वरेच्छा बोधश्च उभौ सम्बन्धौ भवितुं नार्हतः। यदि च एतौ सम्बन्धौ स्वीकरिष्येते तदा **धूमाद्**

**वह्निज्ञानं जायताम्** इत्यादिषु इच्छाविषय एव हेतुसाध्ययोः सम्बन्धः स्यात्। अनेन नैयायिकानामनुमानार्थं यद् व्याप्तिज्ञानं तन्निरर्थकं स्याद्।[xxii]

किञ्च शक्तेः पदपदार्थयोस्सम्बन्धरूपत्वेनेच्छायाः सम्बन्धिनोः आश्रयतानियामकत्वाभावेन सम्बन्धत्वासम्भवः। **सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामकः** इत्यभियुक्तव्यवहारात्[xxiii]। अत्रेदं तात्पर्यं- यः सम्बन्धो भवति सः सम्बन्धिद्वाद् भिन्नो द्विष्ठः सन् आश्रयतया विशिष्टबुद्धिनियामको भवति। तद्यथा घटवद्भूतलमित्यादौ घटभूतलयोः यः संयोगसम्बन्धः सः घटसम्बन्धितो भूतलसम्बन्धितश्च भिन्नः द्वयोर्घटभूतलयोर्निष्ठः घटनिरूपितो यः संयोगस्तदा आश्रयाश्रयो भूतलमिति विशिष्टाया बुद्धेर्बोधस्तन्नियामकश्च। तथाऽत्र घटशब्दो घटशब्दार्थो वा इच्छावान् इति व्यवहारो नैव दृश्यते। तथैव नात्र सम्बन्धः सम्बन्धिभ्यां भिन्नो द्व्याश्रयः कस्यापि विशिष्टबुद्धेर्नियामकश्च दृश्यते। इच्छादीनामात्मगुणत्वादचेतनात्मनि पदे पदार्थे च नितरामसम्भवः। अनेन नैयायिकाभिमतं इच्छायाः जनकत्वस्य वा शक्तित्वं निरस्तिम्।

**शक्तिभेदाः**

नागेशेन शक्तेः त्रयो भेदाः स्वीकृताः। यथा रूढिः यौगिकः, योगरूढिश्च। आलङ्कारिकैरपि शक्तेः भेदत्रयं प्रतिपादितम्। रूढिमयी, योगमयी, उभयी च[xxiv]।

**रूढिः-** यत्र शास्त्रकारणां कल्पितावयवानां प्रकृतिप्रत्ययानाम् अर्थप्रतीतिर्न भवति, किञ्च प्रकृतिप्रत्ययानां समुदायमात्रे अर्थबोधः सा रूढिः। अप्ययदीक्षितापादैः रूढेः लक्षणमित्थं प्रतिपादितं यद् **–यत्र अखण्डशक्तिमात्रेणैकार्थप्रतिपादकत्वं रूढिः**[xxv]। अत्रायं भावः – यत्र अवयवार्थस्याप्रतीतिः यत्र वा अवयवार्थस्य अर्थात् प्रकृतिप्रत्ययार्थस्य अभावात् अखण्डशक्त्या ( रूढिद्वारा) एतेषामर्थबोधः। परन्तु गोपदं गच्छतीति व्युत्पत्या गम्धातोः उणादिप्रत्ययेन निष्पद्यमानमपि गोपदादवयवार्थस्य नैव प्रतीतिः। अतः गोपदादपि रूढ्याऽर्थप्रतीतिर्भवति। अनया गोशब्देन गलकम्बविशिष्टपशुरूपार्थस्य बोधः।

**यौगिकी–** वैयाकरणानां मते **यत्र शास्त्रकृत्कल्पितप्रकृतिप्रत्ययानामेवार्थबोधः त्तर यौगिकी शक्तिः।**[xxvi] यथा पाचकादौ। पाचकशब्दस्य पचतीति व्युत्पत्या अवयवार्थद्वारैवार्थप्रतीतिः। पाचकशब्दः पच्धातोः कर्त्तरि ण्वुल्प्रत्ययेन निष्पद्यते। अत्र पच्धातोः विक्लित्यनुकूलो व्यापारार्थः कर्त्रर्थः। प्रकृतिप्रत्ययोरन्तर्भाविण अवयवशक्त्या पाककर्त्तारं बोधयति।

**योगरूढिः-** या योगेन अवयवशक्त्या, रूढ्या समुदायशक्त्या चार्थं प्रतिपादयति सा योगरूढिः[xxvii]। अर्थात् यत्र अवयवशक्तिः समुदायशक्तिश्च परस्परसहकारिण्यौ भवतः तत्र योगरूढिः। उदाहरणं यथा पङ्कजपदमे यौगितत्वमस्ति। रूढित्वमप्यस्ति। तथाहि पङ्कजपदम् अवयवशक्त्या पङ्कजनिकर्तृरूपार्थं बोधयति। समुदायशक्त्या च पद्मरूपत्वं बोधयति। अतः पङ्कजपदे

योगरूढिशक्तिरस्ति। नागेशमते- **शास्त्रकल्पितावयवार्थान्वितविशेषभूतार्थनिरूपिता शक्तिर्योगरूढिः**[xxviii]।

केचिद् यौगिकरूढमित्याधारीकृत्य शक्तेः भेदचतुष्टयं स्वीकुर्वन्ति। तद्यथा- **यत्र अवयवशक्तिः समुदायशक्तिश्च परस्परं सहकारिण्यौ न भवतः परन्तु स्वातन्त्र्येण एवार्थं प्रतिपादयतः तद्यौगिकरूढम्।** यथा मण्डपोद्भिदादौ। मण्डपशब्दस्य समुदायशक्त्या (रूढिशक्त्या) गृहविशेषः। यौगिकशक्त्या ( अवयवशक्त्या) मण्डपानकर्त्ता इत्यर्थः। अतोऽत्र मण्डपशब्दे यौगिकरूढ्या अर्थबोधः। तथैव उद्भिदपदमपि योगशक्त्या उद्भेदनकर्त्ता वृक्षगुल्मादिः बुध्यते। रूढ्या च उद्भिदनामकयागविशेषस्य प्रतीतिर्भवति। **उद्भिदा यजेत पशुकाम** इति विधानात्। अतः उद्भिदपदे यौगिकरूढम्।

**अनेकार्थेषु शब्देषु शक्तेः नियमनम्**

ननु अर्थभेदाच्छब्दभेदो जायते। तेन नानार्थकत्वासम्भव इति चेन्न। आनुपूर्व्यैक्येन शब्दानां नानार्थकत्वव्यवहारात्। नानार्थकस्य शब्दस्य कस्मिन्नर्थे प्रतीतिर्भविष्यतीति जिज्ञासायामुच्यते यत् सा शक्तिः अनेकशक्तिकस्य शब्दस्य संयोगादिभिः नियम्यते। विषयेऽस्मिन् भर्तृहरिणा वाक्यपदीये प्रतिपादितम्-

**संयोगो विप्रयोगश्च साहचर्यं विरोधिता।**
**अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः।।**
**सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।**
**शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः।।**

**संयोगः-** तत्र संयोगो नाम नानार्थशब्दशक्त्यान्तरवृत्तितयाऽप्रसिद्धत्वे सति तच्छक्यवृत्तित्वेन प्रसिद्धः सम्बन्धः। ऋग्वेदे संयोगस्योदाहरणं प्रदत्तमस्ति। यथा – **इन्द्रो अस्माम् अरदद् वज्रबाहुः।**[xxix]लोके तु **सशङ्खचक्रो हरिः** इत्यत्र शङ्खचक्रयोः संयोगेन हरिशब्दस्यार्थः भगवति नियम्यते। अन्यथा हरिशब्दस्य बह्व्यर्थकत्वात् अन्यत्रार्थप्रतीतिर्स्याद्।

**विप्रयोगः-** विप्रयोगो नाम विश्लेषः। **अशङ्खचक्रो हरिः** इत्यत्र शङ्कचक्रयो विश्लेषेऽपि अत्र हरिशब्दस्य भगवत्येवान्वयः। **अवत्सा धेनुः** इत्यत्र धेनुशब्दस्य गव्येवान्वयः। तस्यैव वस्तुनो हि पृथकत्वं जायते यत् प्राक् केन सहाऽऽसीत्। अतएव **अशङ्खचक्रो हरिः** इत्यत्रापि प्रतीयते यत् हरिः शङ्खचक्राभ्यां सह पूर्वमासीत्। परन्तु इदानीं विश्लेषो जातः। एवम् **अवत्सा धेनुः** इत्यत्रापि। अनेन विप्रयोगेनाऽपि शक्तिः नियम्यते।

**साहचर्यम्-** साहचर्यं नाम सादृश्यम्, एककालदेशावस्थायित्वम् एकस्मिन्नर्थे परस्परसापेक्षत्वं वा। **रामलक्ष्मणौ** इत्यस्मिन्नुदाहरणे रामशब्दस्य **रामः पशुविशेषे स्याज्जामदग्न्ये हलायुधे राघवे चासीत्ते श्वेते मनोज्ञेऽपि च वाच्यताम्** इति विश्वकोषादनेकार्थत्वेऽपि लक्ष्मणशब्दस्य साहचर्यात्

दशरथौ शक्तिर्नियम्यते न भार्गवादौ। तथैव लक्ष्मणशब्दस्यापि **सारसदुर्योधनपुत्रादौ** नानीर्थप्रसिद्धसत्वेऽपि रामशब्दस्य साहचर्येण सौमित्रावेवान्वयः न तु दुर्योधनपुत्रादौ।

**विरोधिता-** विरोधितानाम प्रसिद्धं वैरं सहानवस्थानं वा। द्वयोः परस्परवैरप्राणिनोः एकत्रावस्थानेनानेकार्थस्य शब्दस्य शक्तिः एकस्मिन्नर्थे नियम्यते। यथा **रामार्जुनौ** इत्यत्र बध्यघातकसम्बन्धत्वात् रामभार्गव एव न तु दशरथादिः। तद्बध्यत्वाच्चार्जुनः कार्तवीर्य एव न पाण्डवादिः। तथैव **कर्णार्जुनौ** इत्यत्र बध्यघातकसम्बन्धत्वात् अर्जुनशब्दस्य पार्थे शक्तिर्नियम्यते।

**अर्थः- अर्थः** प्रयोजनम्, **स्थानुं वन्दे भवच्छिदे** इत्यत्र भवच्छेदसरूपप्रयोजनवशात् अत्र स्थानुः शिवः।

**प्रकरणम्-व**क्तृश्रोतृबुद्धिस्तथा। यत्र प्रसङ्गमवलोक्य अर्थनियमनं क्रियते तत्र प्रकरणवशादेवार्थनियमनं भवति। यथा **सैन्धवमानय** इत्यत्र सैन्धवशब्दस्य लवणार्थे अश्वार्थे च शक्तिः। परन्तु भोजनकाले सैन्धवमानय इति वाक्यश्रवणे श्रोतुः प्रकरणवशात् लवणार्थबोधः। यात्राकाले तु सैन्धवशब्दस्याश्वार्थबोधः। अनेन प्रकरणवशादपि नानार्थकशब्दस्य शक्तिः नियम्यते।

**लिङ्गम्-** लिङ्गं नाम चिह्नम्। संयोगातिरिक्तसम्बन्धेन सम्बद्धो व्यावर्त्तकधर्मो लिङ्गम्। यथा **कुपितो मकरध्वजः**इति मकरध्वजपदं कर्मधारयबहुव्रीहिभ्यामनेकार्थकम्। परन्तु अत्र कुपितशब्दस्य लिङ्गमात्रेण कोपस्य मकाराकरध्वजेऽसम्भवात् कन्दर्पस्यैव बोधकत्वम्।

**अन्यस्य शब्दस्य संन्निधिः-** पूर्वोक्तस्य सामानाधिकरण्यम्। अर्थात् तुल्यविभक्तिरूपशब्दस्य सान्निध्यात् विशिष्टार्थस्य प्रतीतिः। यथा **देव पुरारिः** इत्यत्र पुरारिशब्दस्य देहार्थवाचकत्वेऽपि समानाधिकरण्यस्य देवशब्दस्य सान्निध्यात् देवपदं शिवमात्रबोधकम्।

**सामर्थ्यम्-** कारणतानिर्दिष्टजननशक्तिः सामर्थ्यम्। **मधुना मत्तःकोकिलः** इत्यत्र मधुपदं दैत्यविशेषाद्यनेकार्थकम्। परन्तु अत्र कोकिलोन्मादनायां वसन्तस्य एव सामर्थ्यात्वात् मधुशब्दस्य वसन्ते शक्तिर्नियम्यते।

**औचिती-** तत्रौचिती नाम योग्यता। यथा **गुरुरेव परं ब्रह्म** इत्यत्रौचित्याद् गुरुशब्दस्य ज्ञानदातरि शक्तिः। एवञ्च **जीव जल्पति** इत्यत्र योग्यतया जीवशब्दस्य व्रृहस्पतौ शक्तिर्नियम्यते। तस्यैव ग्राह्यवचनत्वात्।

**देशः-** समभिव्याहृतप्रदेशो नगरग्रामादिर्वा। यथा **वैकुण्ठे हरिर्जयति** इत्यत्र हरिशब्दस्य नानार्थकत्वेऽपि वैकुण्ठरूपदेशेन हरिशब्दस्य विष्णौ शक्तिः। एवं **विभाति गगने चन्द्रः** इत्यत्र चन्द्रपदं कर्पूराद्यनेकार्थकम्। परन्तु गगनप्रदेशे चन्द्रः शशी एव।

**कालः-** दिवसादिः। यथा **निशि चित्रभानुः** इत्यत्र चित्रभानुपदं वह्निसूर्याद्यनेकार्थकम्। परन्तु रात्रौ चित्रभानुः बह्निरेव न तु सूर्यः। एवं **दिवा विभावसुर्भाति** इत्यत्र दिवसरूपकालेन सूर्ये विभावसुशब्दस्य शक्तिः।

**व्यक्तिः-** पुंनपुंसस्त्रीत्वानि। **भाति रथाङ्गम्** इत्यत्र नपुंसकव्यक्त्या रथाङ्ग इत्यस्य चक्रार्थः। पुंलिङ्गे तु चक्रवाकार्थः। एवं **मित्रो जयति** इत्यत्र पुंलिङ्गेन सूर्यः। मित्रं जयति इति नपुंसकलिङ्गेन सुहृत्।

**स्वरः-** उदात्तानुदात्तस्वरितश्चेति। स्वरसंस्कारयोः छन्दसि नियमः इति निर्दिष्टत्वात् एतस्य महत्त्वं वेदेष्वेव। **इन्द्रशत्रुर्वर्धस्व** इत्यत्र इन्द्रस्य शत्रुः इति तत्पुरुषसमासे अन्तोदात्तो भवति। अनेन इन्द्रशत्रुशब्दस्यार्थः वृत्रासुर इत्यस्मिन्नर्थे शक्तिः। बहुव्रीहिसमासे कृते स्वरभेदेन इन्द्र एव शातयिता इत्यस्मिन्नर्थे शक्तिः। अनेन स्वरेणाऽपि शक्तिर्नियम्यते। एभिः प्रमाणैः स्पष्टं ज्ञायते यत् नानार्थेषु शक्तेर्नियमनं भवतीति।

अनेन प्रकारेण मया सारल्येन शक्तेः विभिन्नानि मतानि प्रतिपादितानि। अत्र प्रबन्धे सर्वेषां मते आलोचितानि मतानि मया उल्लेखितानि।

---

**सन्दर्भाः**

[i].महाभाष्यम् पृ-167

[ii].तादात्म्येव शब्दार्थयोः सम्बन्धो नादाभव्यक्तस्यान्तःकरणसन्निवेशिनः शब्दस्य अर्थबोधने कारणम्।– वाक्यपदीयम् (हरिवृषभटीका) 3.3.35

[iii].वाक्यपदीयम् 3.3.38

[iv] .सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामकः इत्यभियुक्तव्यवहारात्। प.ल.म.पृ-37

[v].वैयाकरणसिद्धान्तलघुमञ्जूषा पृ-21

[vi].तस्यापि पदनिष्ठशक्त्युपकारत्वाच्छक्तिरिति व्यवहारः, तस्य सम्बन्धत्वासम्भवात्। भेदाभेदरूपस्य तस्य तत्त्वासम्भवात्। तद्घटकभेदस्याभेदस्य वा तत्त्वादर्शनात्। - वैयाकरणसिद्धान्तलघुमञ्जूषा (रत्नप्रभाटीका). पृ-22

[vii].व्यापारस्तु भावनाभिधा, साध्यत्वेनाभिधीयमाना क्रिया। - वैयाकरणभूषणसारः, पृ-8

[viii].स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते। - काव्यप्रकाशः, पृ-38

[ix].तत्र सङ्केतितार्थस्य बोदनादग्रिमाभिधा। साहित्यदर्पणम् पृ-40

[x].साक्षात् सङ्केतितविषयो मुख्यः- काव्यानुशासनम्, पृ-4

[xi].वाच्यर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः।
व्यङ्ग्यो व्यञ्जनया ता स्युस्तिस्रः शब्दस्य शक्तयः। - साहित्यदर्पणम्.पृ-38

[xii].सा.मी पृ-3

[xiii].रसगङ्गाधर.पृ-235

[xiv].ईश्वरसंकेतः शक्तिः। शक्तिवादः,पृ-26

xv.तत्र शक्तिः कः पदार्थः इति चेदस्माच्छब्दादयमर्थो बोधव्य इत्याकरा, इदं पदमिममर्थं बोधयतु इत्याकारा वेश्वरेच्छा। वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ-26

xvi.आधुनिके नाम्नि शक्तिरस्त्येव। का.व.पृ-547

xvii.तथा सति शक्तिभ्रमं लक्षणाग्रहं चान्तरेण आधुनिकसङ्केतग्रहः।

xviii.वृ.स पृ-5

xix.का. व.पृ- 543

xx.वैयाकरणसिद्धान्तलघुमञ्जुषा (रत्नप्रभाटीका) पृ-17

xxi .प्रमाणानां किञ्चैवं- इदमस्माद् भवतु इतीच्छाविषयत्वमेव जनकत्वं स्यादिति बहूपल्पवः। वैयाकरणसिद्धान्तलघुमञ्जुषा पृ- 17

xxii.किञ्च प्रामाणां जनकत्वतद्घटितसम्बन्धातिरिक्तसम्बन्धेनैव प्रमेयसम्बद्धानां ज्ञानजनकत्वदर्शनेन इह तयोः सम्बन्धत्वेनौचित्यम्, अन्यथा धूमाद्वह्निमान् जायताम् इतीश्वरेच्छाविषयत्वमेव तद्बोधजनकत्वमेव वा हेतुसाध्ययोस्सम्बन्धः स्यादिति। - वैयाकरणसिद्धान्तलघुमञ्जुषा पृ-17

xxiii.वैयाकरणसिद्धान्तलघुमञ्जुषा।

xxiv.प्रथमा त्रिविधा तत्र रूढियोगस्तथोभयी। - कोविदानन्द, पृ- 24

xxv.वृत्तिवार्तिकम्- प-22

xxvi.शास्त्रकल्पितावयवार्थनिरूपिता शक्तिर्योगः। यथा – पाचकादौ। वैयाकरणसिद्धान्तलघुमञ्जुषा-88

xxvii.यत्र तु अवयवशक्तिविषये समुदायशक्तिरप्यस्ति तत् योगरूढम्। काव्यप्रकाश- पृ-584

xxviii.परमलघुमञ्जुषा पृ-50

xxix.ऋग्वेद- -3.33.6

## ➢ <u>परिशीलितग्रन्थसूची</u>


❖ अष्टाध्यायी, ज्ञानभारती पाब्लिकेशन्, दिल्ली, २००९

❖ आनन्दवर्धनः, ध्वन्यालोकः, जगन्नाथपाठकः, चौखम्बा विद्यभवन, वाराणसी, संस्करणम् – 2001

❖ नागेशः, वैयाकरणसिद्धान्तलघुमञ्जुषा.कृष्णदास संस्कृत सीरीज्,वाराणसी 2011

❖ नागेशः,परमलघुमञ्जुषा.कृष्णदास संस्कृत सीरीज्,वाराणसी 2011

❖ भर्त्तृहरिः, वाक्यपदीयम्, शम्भुदयालपाण्डेयः,चौखाम्बा ओरियन्टलिया, गोकुलदास संस्कृतग्रन्थमाला,दिल्ली-110007

❖ भामहः, काव्यालङ्कारः, चौखम्बा संस्कृत सीरिज् अफिस्, वाराणसी, 2002

❖ मम्मटः, काव्यप्रकाशः, “आज” भवन् सन्त कबीर मार्ग, वाराणसी(221001 यू.पी), जुलाई, 2016

❖ महाभाष्यम्, पतञ्जलिः, चौखम्बा कृष्णदास अकादमी, वाराणसी, २००८

- लोकमणिदाहल व्याकरणशास्त्रेतिहासः, , भारतीयविद्याप्रकाशन- वाराणसी,1990
- वामनः, काव्यालङ्कारसूत्रवृत्तिः, प्रो. केदारनाथ शर्मा, कृष्णदास अकादेमी, वारणसी – 1979
- विश्वनाथः, साहित्यदर्पणः, आचार्यः कृष्णमोहनशास्त्री, चौखम्बा संस्कृत संस्थान वाराणसी, पुनमुर्द्रण – 2013
- वैयाकरणभूषणसारः, महामहोपाध्यायश्रीकौण्डभट्टविरचितः, चौखम्बा संस्कृत सीरीज वनारस्, 1939
- श्रीभर्तृहरिः वाक्यपदीयम्, , वामदेव आचार्यः, चौखम्बा कृष्णदास अकादमी वाराणसी, 2000
- श्रीमद्यास्कमुनिप्रणीतम् निरुक्तम्, , चौखम्बा संस्कृतप्रतिष्ठान, दिल्ली, 1989
- श्रीवासुदेवशर्मा ईशाद्यष्टोत्तरशतोपनिषदः, चौखम्बा-विद्याभवनम्, दिल्ली,1995
- संस्कृत शास्त्र का इतिहास, बलदेव उपाध्याय, शारदा मंदिर, वाराणसी, 1969